# ।। श्रीमद् अग्निपुराणम् ।।

विद्वान्. बिदरहल्लीत्युपाह्वः कृष्णाचार्यः

## प्रथमाध्यायः

**श्रियं सरस्वतीं गौरीं गणेशं स्कन्दमीश्वरम् । ब्रह्माणं वह्निमिन्द्रादीन् वासुदेवं नमाम्यहम् ।**

परविद्या -

**मुनिभिः पृष्टः सूतः सर्वज्ञताप्रापकां वशिष्टेन व्यासायोपदिष्टां, व्यासस्तु शुक्रादीनामुदिष्टां विद्यामुपदिदेश । तदेव 'अग्निपुराणम्' । कलावग्निना विष्णुनारदयोपदिष्टमिदम् ।**

**कालाग्निरूपिणं विष्णुं ज्योतिर्ब्रह्मं परात्परम् ।**

**मुनिभिः पृष्टवान् देवं पूजितं ज्ञानकर्मभिः ।।**

**विष्णुः कालाग्निरुद्रोऽहं विद्यासारं वदामि ते इति ।**

**सर्गप्रतिसर्गादिपञ्चविषयान्यन्यपुराणवदत्रापि प्रतिपादितानि । उपनिषदि प्रसिद्धो विषयः 'द्वेविद्ये वेदितव्ये परा चापरा च' इति । स विषयोऽत्र प्रस्तापितोऽस्ति । ऋगादि वेदाः शिक्षाव्याकरणादयो वेदाङ्गाः, धनुर्वेदार्थशास्त्राण्यपरविद्या । अपरेयं परा विद्या यया ब्रह्माभिगम्यते इति । इयं च विद्या पुरा वशिष्टायोक्ताग्निना । देवेभ्यो ब्रह्मणोक्ता च ।**

द्व्यशीत्यधिकत्रिशततमोऽध्यायः

यमगीता- सतां भक्तिमुक्तिप्रदां नाचिकेतस उपदिष्टां यमगीतामग्निरुपदिदेश।

यम उवाच- अस्थिरं शयनमासनं यानं धनं वाञ्छन्ति जनाः, परन्तु मनुष्याणां परं श्रेयः कपिलब्रह्मजैगीषव्यपञ्चशिखमुखैर्मुनिभिश्चोक्तं तमुपदेक्षामि।

'प्रवृत्तं च निवृत्तं च कार्यं कर्मपरोऽब्रवीत् । श्रेयसां श्रेय एतद्धि नैष्कर्म्यं ब्रह्म तद्धरिः ।।

नास्ति विष्णुसमं ध्येयं तपो नानशनात् परम् । नास्त्यारोग्यसमं धन्यं नास्ति गङ्गासमा सरित् । न सोऽस्ति बान्धवः कश्चिद् विष्णुं मुक्त्वा जगद्गुरुम् । अधश्चोदूर्ध्वं हरिश्चाग्रे देहेन्द्रियमनोमुखे । इत्येवं संस्मरन् प्राणान् यस्त्यजेत् स हरिर्भवेत् । स विष्णुः परमं ब्रह्म यतो नावर्तते पुनः । तत्पदं नाप्नुयात् सुवर्णादिदानेन, न ध्यानेन, न व्रतैः, नापि घर्मादिसूक्तपठनेन च। हरिप्रसादार्थं एतद्विजानीयात्

'आत्मानं रथिनं विद्धि शरीरं रथमेव च । बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ।

इन्द्रियाणि हयानाहुः विषयांस्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ।।

यस्त्वविज्ञानवान् भवत्युक्तेन मनसा सदा । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ।।

इत्याद्युपनिषन्मन्त्राक्षराण्येव संगृहीताः सन्ति ।

अन्ततोऽग्नेर्वचनम्-

वशिष्ठयमगीतोक्ता पठतां भुक्तिमुक्तिदा । आत्यन्तिको लयः प्रोक्तो वेदान्तब्रह्मधीमयः ।।

त्र्यशीत्यधिकत्रिशततमोऽध्यायः

अग्निपुराणमाहात्म्यम् -

सूत उवाच-

''नास्मात् परतरं ज्ञानं नास्मात् परतरा स्मृतिः ।

नास्मात् परो ह्यागमोऽस्ति नास्माद् विद्या पराऽस्ति हि ।।

नास्मात् परतरं भूमौ विद्यते वस्तु दुर्लभम् ।'' इति । पुराणेऽस्मिन् हरिवंशः, भारतः, रामचरितश्चोक्तः । देवप्रतिष्ठाविधिः, प्रतिमालक्षणं, नानाविधमण्डलानि, नानामन्त्राणि, नानादेवपूजाविधयः, शैवशाक्ताद्यगमाः, गयादिक्षेत्राणां, गङ्गादितीर्थाणां च महिमा, मन्वन्तरकथा, आशौचं, द्रव्यशुद्धिः, शशिसूर्यवंशौ, राजधर्मः, दानधर्मः, धनुर्वेदः, नानाशान्तयः इत्यनेका विषया उपदिष्टाः। इदं पञ्चदशसाहस्रं शतकोटिप्रविस्तरमासीत्, लोकानां हितकाम्यया सङ्गृह्योपदिदेशाग्निः ।

वशिष्टो श्रीव्यासं-

''व्यासाग्नेयपुराणं ते रूपं विद्याद्द्वयात्मकम् । कथितं ब्रह्मणो विष्णोरग्निना कथितं यथा ।।

पुराणमग्निना गीतमाग्नेयं ब्रह्मसम्मितम् । यः पठेत् श्रुणुयाद् व्यास लिखेद्वा लेखयेदपि ।।

श्रावयेत् पाठयेद्वापि पूजयेद् धारयेदपि । सर्वपापविनिर्मुक्तः प्राप्तकामो दिवं व्रजेत्।। '' इति ।

स्वतोऽग्निनोक्तम्-

''आग्नेयं ब्रह्मरूपं ते पुराणं कथितं मया । सप्रपञ्चं निष्प्रपञ्चं विद्याद्द्वयमयं महत् ।।

अनिष्ट्वा तु महायज्ञान् अकृत्वापि पितृस्वधां । किं तीर्थैर्गोप्रदानैर्वा किं यज्ञैः किमुपोषितैः ।।

इत्याद्यनेककर्मभिर्यत् पुण्यं तदाग्नेयपुराणपठनात् श्रवणादेव प्राप्नुवन्ति जनाः ।

आग्नेयं ये हि श्रुण्वन्ति अहन्यहनि मानवाः ।

कृष्णमभ्यर्चयन् भक्त्या नैनसो भाजनं भवेत् ।

सर्वकारणम् अत्यन्तं विष्णुं ध्यायन् न सीदति ।'' इत्यादि ।

।। इत्यग्निपुराणं समाप्तम् ।।